Kendriya Sanskrit Vidyapeetha-Series No. 2.

DEVATĀDHYĀYA BRĀHMAṆA

विषयानुक्रमणिका

ॐ

देवताध्यायब्राह्मणम्

सायणाचार्यविरचितेन

वेदार्थप्रकाशेन समन्वितम्

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ २ ॥

तत्कटाक्षेण तद्रूपं दधद् बुक्कमहीपतिः ।
आदिशत्सायणाचार्यं वेदार्थस्य प्रकाशने ॥ ३ ॥

ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात् ।
कृपालुः सायणाचार्यो वेदार्थं वक्तुमुद्यतः ॥ ४ ॥

व्याख्यातावृग्यजुर्वेदौ सामवेदेऽपि संहिता ।
व्याख्याता ब्राह्मणस्याथ व्याख्यानं संप्रवर्तते ॥ ५ ॥

अष्टौ हि ब्राह्मणग्रन्थाः प्रौढं ब्राह्मणमादिमम् ।
षड्विंशाख्यं द्वितीयं स्यात् ततः सामविधिर्भवेत् ॥ ६ ॥

आर्षेयं देवताध्यायो भवेदुपनिषत्ततः ।
संहितोपनिषद्वंशो ग्रन्था अष्टावितीरिताः ॥ ७ ॥

तत्राद्या ब्राह्मणग्रन्थाश्चत्वारो व्याकृताः पुरा ।
देवताध्यायसंज्ञस्तु ग्रन्थो व्याक्रियतेऽधुना ॥ ८ ॥

A. om. verses 1-7: K. om. the first verse: T. is much damaged and has lost first two khaṇḍas. It begins with [देवताभिधानानं] तरम् अतः यतो निर्वचनेन (1.3.1)

6. L. प्रकाशनम् for प्रकाशेन.

10. SJR. ब्राह्मणानां for ब्राह्मणस्याथ.

11. K. प्रौढब्राह्मणमादिकम् for प्रौढं ब्रा°.

14. SJRA. °वुदीरिताः for °वितीरिताः.

15. A. (आ) द्य° for (आ) द्या°.

साम्नां निधनभेदेन देवताध्ययनाद्यम् ।
ग्रन्थोऽपि नामतोऽन्वर्थाद् देवताध्याय उच्यते ॥ ९ ॥

तत्राद्ये बहुधा साम्नां देवताः परिकीर्तिताः ।
द्वितीये छन्दसां वर्णास्तेषामेव च देवताः ।
तृतीये तन्निरुक्तिश्चेत्येवं खण्डार्थसंग्रहः ॥ १० ॥

प्रथमः खण्डः

तत्रादौ साम्नां निधनभेदेन तद्देवताभिधानाय ता एवानुक्रमते —

अग्निरिन्द्रः प्रजापतिः सोमो वरुणस्त्वष्टाङ्गिरसः पूषा सरस्वतीन्द्राग्नी ॥ १ ॥

एताः सामदेवताः इति शेषः ॥ १ ॥

तत्रादावग्निदेवत्यानि सामान्याह —

इडानिधनानि पदनिधनानीकारणिधनानीत्याग्नेयानि ॥२॥

निधनं नाम पाञ्चभक्तिकस्य साप्तभक्तिकस्य वा साम्नोऽन्त्यो भागः । सर्वत्र साम्नां चतुर्विधं निधनम् । स्वरो निधनमिडा वागिति । तदेतदेवान्ते

---

2. A. नाम्ना चा°, K. नाम्ना ता°, SJR. नामतोऽन्वर्थो° for नामतोऽन्वर्थाद्.

3. SJ, देवताः प्रीतिकीर्तनम्, R. देवताः प्रतिकीर्तिताः; ALIJ. देवतापरिकीर्तनं for देवताः परि.

4. द्वितीयश्° for द्वितीये.

7. SJR. om. तद्°. L. °क्रामति for °क्रमते.

8. K. adds बृहस्पतिः after पूषा.

11. R. °दैवत्यानि for °देवत्यानि, A. om. सामान्याह.

13. A. निधनानां for निधनं नाम; A. पाञ्चविभक्तिकस्य साप्तविभक्तिस्य, SJR. पञ्च° सप्त° for पाञ्च °साप्त°; A. सोमेन for साम्नः.

14. ML. सर्वं° for सर्वत्र; RSJ. सामतश्चतुर्विधः for साम्नां°; ARSJK. om. निधनम् *see* CN; ARSJK. स एव for तदेतदेव; RSJ. अन्तर्निधनं बहिर्निधनम् for अन्ते [निधनम्]°; MKA. om. अन्ते; see CN.

निधनम्] अन्तर्निधनमिति च द्वेधा । तत्र निधनादित्रितयव्यतिरिक्तस्य स्वर इति रूढ्या नामधेयम् । इडानिधनानि कालेयरौरवादीनि । बाह्याक्षर-नैरपेक्ष्येण ऋगन्त्यपदान्येव यत्र निधनस्थानीयानि तानि पदनिधनानि यौधाजय-संहितादीनि । ईकारणिधनानि महावत्सप्रमहावैराजादीनि । उक्तत्रिविध-निधनानि यानि सामानि तान्येतान्याग्नेयानि अग्निदेवताकानि ॥ २ ॥

अथेन्द्रदेवत्यान्याह —

सर्वाणि निधनवन्त्यैन्द्राण्यन्यान्यादिष्टेभ्यः ॥ ३ ॥

आदिष्टेभ्यः इडानिधनानीत्याद्युक्तेभ्यः **सर्वाणि स्वाराणि प्राजा-पत्यानि** इति वक्ष्यमाणेभ्यश्च [**अन्यानि**] व्यतिरिक्तानि यानि **निधनवन्ति** सन्ति तानि **सर्वाणि ऐन्द्राणि** इति जानीयात् ॥ ३ ॥

अथ प्रजापतिदेवताकान्याह —

सर्वाणि स्वाराणि प्राजापत्यानि ॥ ४ ॥

स्वर्यमाणम् ऋगन्त्याक्षरं हाउकारश्च स्वरनिधनम् । तद्वन्ति **सर्वाणि प्राजापत्यानि** इति ॥ ४ ॥

1. AK. ˚तृतीय L. त्रय˚ for त्रितय; A ˚रिक्तस्वर˚ for ˚रिक्तस्य स्वर.

2. MLA. om. रूढ्या. SJR. add इति after निधनानि; AK. गुह्या˚ for बाह्या.

3. SJL. नैरपेक्षेण for नैरपेक्ष्येण; A. जगत्या, L. ऋगन्त for ऋगन्त्य˚; A. om. तानि; A. adds तृतीयव्यतिरिक्तस्वर इति after ˚निधनानि.

4. RSJA. om. महावत्सप्र; K. महावात्सप्र for महावत्सप्र˚; RSJ. वैराजादीनि for महावैराजदेनि.

5. L. trans. यानि after सामानि; RSJ. om. एतानि.

6. RL. दैवत्यानि for देवत्यानि.

8. L. om. आदिष्टेभ्यः; RSJ ˚निधनाद्युक्तेभ्य˚, K. ˚निधनाद्याद्युक्तेभ्यः A. ˚निधनान्यन्यान्युक्तेभ्यः˚, ML. निधनानीत्युक्तेभ्यः for ˚निधनानीत्याद्यु-क्तेभ्यः; RSJL om. सर्वाणि स्वाराणि प्राजापत्यानि इति; *see* CN.

9. RSJAK. om. च.

13. RSJ. add उक्तलक्षणम् after स्वर्यमाणम्; A. स्वर्यमाणा ऋगक्षरा हाउकारस्वर˚ for स्वर्यमाणम्...; A. om. तद्वन्ति सर्वाणि प्राजापत्यानि इति. RSJK. om. सर्वाणि.

उक्तलक्षणं साम स्वयमेवोदाहरति —

यथा वामदेव्यम् ॥ ५ ॥

एतद् हाइकारयुक्तस्योदाहरणम् ॥ ५ ॥

अथ सोमदेवत्यान्याह —

ऋक्सामानि सौमानि ॥ ६ ॥

यानि ऋगक्षरव्यतिरिक्तस्तोभरहितानि केवलऋङ्मात्रयुक्तानि तानि ऋक्सामानि ॥ ६ ॥

स्वयमेव तान्युदाहरति —

यथौशनकावे ॥ ७ ॥

अथ वरुणदेवत्यान्याह —

वाङ्निधनानि वारुणानि ॥ ८ ॥

वाङ्निधनवन्ति वाङ्निधनानि वारुणानि ॥ ८ ॥

उक्तलक्षणं साम उदाहरति —

यथा यज्ञायज्ञीयम् ॥ ९ ॥

अथ त्वष्टृदेवत्यान्याह —

---

1. RSJ. om उक्तलक्षणं; A. adds तद्वद् before उक्त°; A. om स्वयमेव.

4. R. °दैवत्या° M. °देवता° for °देवत्या°.

5. AML. सौम्यानि for सौमानि.

6. RSJ. ऋगक्षराणि स्तोभादिरहितानि केवलतानमात्रयुक्तानि तान्येव for ऋगक्षर ... तानि.

7. A. adds सौम्यानि सोमदेवत्यानि after °सामानि.

9. यथौशनकावे *see* CN.

12. AK. होवा° for वाङ्° ; RSJ. om. वारुणानि; ALK. add इति after वारुणानि.

14. A. om. from यथा यज्ञा° to तान्युदाहरति (p. 5. l. 3).

15. R. °दैवत्यानि, M. °देवतानि for °देवत्यानि.

अक्षरानुस्वराणि त्वाष्ट्राणि ॥ १० ॥

अक्षरमनुस्वर्यते येषु तानि यथोक्तानि ॥ १० ॥

तान्युदाहरति —

यथा वारवन्तीयं चाभीवर्तश्च ॥ ११ ॥

अथाङ्गिरोदेवत्यान्याह —

स्वःपृष्ठान्याङ्गिरसानि ॥ १२ ॥

अभिसोमास आयवः (सा. ५१८) इत्यादिषु गीतानि स्वःपृष्ठानि ॥ १२ ॥

अथ पूषदेवत्यानां लक्षणमाह —

स्वर्णिधनानि पौषाणि ॥ १३ ॥

काशीतदैवोदासादीनि स्वर्णिधनानि ॥ १३ ॥

अथ सारस्वतस्य लक्षणमाह —

कया नश्चित्र आ भुवद् (ग्राम. ५. ६. १६९. २) आ पवस्व सहस्रिणम् (ग्राम. १४. ४. ५०१. १) इति वाङ्निधने सारस्वते ॥ १४ ॥

---

1. RK. °स्वाराणि for °स्वराणि.

2. M. येषां, K. एतेषु for येषु RSJ. तथोक्तानि for यथोक्तानि; ML. add त्वष्टृदेवत्यानि after यथोक्तानि.

4. SJ. °भिवर्तं, L. °भिवर्तः for °भीवर्तः.

5. RSJ. °देवतानां लक्षणम् M. °देवतानि for °देवत्यानि.

7. KML. (अ)स्यां for (आ)दिषु; SJR. गातव्यानि for गीतानि; RSJ. add आङ्गिरसानि after °पृष्ठानि.

8. RM. °दैवत्यानां for °देवत्यानां.

9. KL. पूषाणि for पौषाणि.

10. RSJ. °प्रभृतीनि for °(आ)दीनि.

11. R. सरस्वद्दैवत्यानि, SJ. सरस्वतीदेवतानि for सारस्वतस्य लक्षणम्.

यद्यपि वाङ्निधनानि वारुणानीति पूर्वमेवोक्तं तथाप्येतयोरुत्पन्ने एव वाङ्निधने सारस्वते । अत एवोक्तद्वयव्यतिरिक्तानां वारुणत्वादपुनरुक्तिः ॥ १४ ॥

अथैन्द्राग्नस्य लक्षणमाह —

य आनयत् परावतः (ग्राम. ३. २. १२७. १-२) **इत्यैन्द्राग्ने ॥ १५ ॥**

य आनयत्परावतः (सा. १२७) [इत्यस्यां ये] द्वे सामनी उत्पन्ने ते इन्द्राग्निदेवत्ये ॥ १५ ॥

अथाग्नेयैन्द्रयोः सामनी आह —

सुतं रयिष्ठाः सहो रयिष्ठा इत्याग्नेयैन्द्रे ॥ १६ ॥

उप नो हरिभिः सुतम् (ग्राम. ४. ४. १५०. २) इत्यस्यान्ते **सुतं रयिष्ठा** इत्येतद् गीयते। तथा **सहोरयिष्ठा** इत्येतद् **यस्ते मदायां** [इत्यस्याः] (१३. १. ४७०. ३) तृतीये गीयते । ते उभे अप्याग्नेयैन्द्रे । एवं निधनभेदेन सर्वेषां साम्नां सामान्येन अग्न्यादीन्द्राग्निपर्यन्ता दश देवता द्रष्टव्याः । आग्नेयैन्द्रयोरनिर्देशेऽप्यैन्द्राग्नस्यैव विपर्यासादनन्यत्वम् ॥ १६ ॥

अथ प्रकारान्तरेण निधनवशात् कृत्स्नसाम्नां देवताभिधानाय ता एवानुक्रमते —

---

1. AK. पूर्वोक्तं for पूर्वमेवोक्तं; A. om. अपि; SJR. अनयोः for एतयोः.

2. A. अथ for अतः; RAML. om. एव; SJR. om. उक्त°; R. एतद् for द्वय°; RSJ. add अस्य before अपुनर्°.

4. SJR. °ग्नलक्षणम् for °ग्नस्य ...

8. SJKA. °ग्नी° for °ग्नि°.

9. ML. °यैन्द्रे for °यैन्द्रयोः.

12. SJRK. om. यस्ते मदायां तृतीये.

13. SJR. अपि for गीयते; SJR. add एव after °यैन्द्रे; SJR. om एवं.

15. AK. °दन्यत्वम् for °दनन्यत्वम्.

16. A. निधनाश्रयत्वात्; ML. निश्रनाश्रय°; K. निधनाश्रवत् for निधनवशात्.

वसवो रुद्रा आदित्या विश्वे देवाः ॥ १७ ॥

यथाग्न्यादयः प्रत्येकं सामदेवताः एवं वस्वादयोऽपि संघात्मकाः सर्वेषां साम्नां निधनचतुष्टयभेदेन देवताः ॥ १७ ॥

अथ निर्देशक्रमेणैव तासां सामानि विभज्य दर्शयति —

वसूनां स्वाराणि रुद्राणां निधनवन्ति आदित्यानामैडानि विश्वेषां देवानां वाङ्निधनानि ॥ १८ ॥

स्वरनिधनादिभेदेन सामान्यभागानां चातुर्विध्यम् । [तत्र] स्वरेडावाङ्निधनव्यतिरिक्तस्य निधनत्वमिति पूर्वमेवोक्तम् । एतेषां लक्षणानि च प्रदर्शितानि ॥ १८ ॥

ननु साम्नां पूर्वमेवाग्न्यादिदेवताकत्वं व्यवस्थितम् । इतः परमपि सर्वाण्याग्नेयानीत्यादिना वक्ष्यते च । [अतः] किमर्थं वस्वादिदेवताकत्वकथनमिति तत्राह —

यथा भूयस्त्वेन प्रदेशा वर्तन्त इत्यन्तराणि ॥ १९ ॥

भूयसो भावो भूयस्त्वम् । संघश इत्यर्थः । तदनतिक्रम्य **प्रदेशाः** साम्नां वस्वाद्युपदेशा वर्तन्ते । अत उक्ताग्नेयाद्यपेक्षया वस्वादिदैवतान्यभ्यन्तराणि । पृथक् पृथक् देवताभिधानात् पूर्वोक्तानां बाह्यत्वम् । इदानीं संघशोऽभिधानादान्तरत्वम् ॥ १९ ॥

---

2. K. अथा° for यथा°; A. अथान्याः for यथाग्न्यादयः; K. प्रथमदेवताः for प्रत्येकं सामदेवताः; K. सुखा°, RSJL. संघाता° for संघा°.

4. RSJ. om. एव; SJ. एतासां for तासां.

7. SJR. स्वरादित्रितयव्यतिरिक्तस्य निधनम् for स्वरेडा°.

8. L. निधनवत्वम्, AK. निधनम् for निधनत्वम्; SJR. add रूढया नामधेयमिति before पूर्वम् *see* CN. A. om. च.

9. A. दर्शितानि for प्रदर्शितानि.

11. A. देवताकत्वम् । कथम्, SJRL. देवताकथनम् for देवताकत्व ...

14. SJ. सर्वश° for संघश°; K. प्रवेशाः for प्रदेशाः.

15. A. om. साम्नां; R. °दैवत्यानि, AKM. देवता, L. देवताभ्यः for °दैवतानि; L. अन्तराणि; M. सोऽन्तराणि for अभ्यन्तराणि.

16. M. om. one पृथक्.

अथोक्तप्रकारदेवताभिधानेन निगूढतरं साम्नां देवतापरिज्ञानप्रकारमाह—

अथान्तरतराणि सर्वाण्याग्नेयानि सर्वाण्यैन्द्राणि सर्वाणि स्वाराणि प्राजापत्यानि सामानीत्यन्तरतराणि ॥ २० ॥

पूर्वत्र साम्नां चतुर्धा विभागेन देवताचतुष्टयाभिधानमेव । इह तु सर्वेषामपि साम्नामग्न्यादिदेवताकत्वाभिधानादन्तरतरत्वम् । स्वराणां प्राजापत्यत्वं पूर्ववदेव । अत्र औशनकावादिस्वरसंग्रहार्थत्वात् अपौनरुक्त्यम् । अत एवान्तरतरत्वम् ॥ २० ॥

अथोक्तप्रकारादपि लघुतरं देवतापरिज्ञानप्रकारमाह —

अथान्तरतमानि सर्वाणि ब्राह्माणि सामानीति सर्वान्तरतमानि ॥ २१ ॥

कृत्स्नसाम्नां ब्रह्मणैवादौ सृष्टेस्तत्तद्देवताव्याजेन तस्यैव प्रतिपाद्यत्वात् ब्राह्मत्वम् ॥ २१ ॥

अथ साम्नां देवतासंबन्धविषये ज्ञातव्यं रहस्यमाह —

अथोपनिषत् ॥ २२ ॥

---

1. J. यथो° for अथो°; RSJ. °प्रकारेण for °प्रकार°; KA. °देवताया अभि° for °देवताभि°; RSJ. °धानेऽपि for °धानेन; MLK. विगूढ, for निगूढ°; A. इतर° for निगूढतरं.

2. AK. अन्तराणि for अन्तरतराणि.; K. om. सर्वाण्यैन्द्राणि सर्वाणि स्वाराणि.

3. SJR. om. स्वाराणि; AK. om. (अ)न्तरतराणि.

4. ASJR. पूर्वं तु for पूर्वत्र; SJR. उक्तम् for एव.

5. RSJ. °कथनाद्, A. °भिधानम् for °भिधानाद्; SJR. om. स्वराणां प्राजापत्यत्वं पूर्ववदेव; A. स्वाराणां for स्वराणां.

6. SJRAK. om. अत्र औशन...°न्तरतरत्वम्; M. om. अत एवान्तरतरत्वम्.

8. A. इतर, J. लघुतर for लघुतरं.

11. SJR. ब्रह्मणः for ब्रह्मणा; A. तदर्थं for तत्तद्.

12. SJR. add सर्वेषां before ब्राह्मत्वम्.

13. A. °विषये ज्ञातव्य° for °विषये ज्ञातव्यं.

कैषा उपनिषदिति दर्शयति —

ऋग्वै माता साम पिता प्रजापतिः स्वरः ॥ २३ ॥

ऋक् प्रसिद्धा । साम गीत्यात्मकम् । स्वरः क्रुष्टादिः ॥ २३ ॥

अस्त्वेवम् । ततः किम्? इत्यत आह —

अथ यान्यृक्त आख्यायन्ते मातृतस्तान्याख्यायन्ते । अथ यानि सामत आख्यायन्ते पितृतस्तान्याख्यायन्ते । अथ यानि स्वरत आख्यायन्ते प्रजापतितस्तान्याख्यायन्ते ॥ २४ ॥

ऋक्त आख्यानानि यज्ञायज्ञीयवारवन्तीययद्वाहिष्ठीयप्रभृतीनि । तेषां मातृभूतऋक्पदेनाख्यानात् मातृतस्तान्याख्यायन्ते । सामत आख्यातानि यौधाजयप्रभृतीनि । तानि पितृत आख्यायन्ते । स्वरत आख्यातानि वामदेव्यादीनि । प्रजापतितस्तान्याख्यायन्ते । एवं समस्तस्योद्गीथस्योद्गानकर्मण ऋक्सामस्वरा इति त्रयोऽवयवास्ते पृथक् पृथक् मातादिभेदेन प्रसिद्धा भवन्ति ॥ २४ ॥

अथोद्गीथस्योक्तविधत्वं प्रशंसति —

स वा एष उद्गीथो बन्धुमान् बन्धुमत्यः ॥ २५ ॥

बन्धवो मातादयस्तद्वान् । न केवलं बन्धुमत्त्वं किंतु तेषां मत्यः मतार्हः संमतश्च ॥ २५ ॥

---

1. K. एव for एषा A. om. दर्शयति; MLK. add ता after इति.

2. M. एष for वै.

4. L. अस्ति for अस्तु; KA. तत्राह for इत्यत आह; RSJ. trans. ततः after किं.

5. SJR. तद् for अथ.

8. SJR. om. °यद्वाहिष्ठीय°.

9. SJR. ऋगवयवभूत° for मातृभूतऋक्°.

10. SJRAK. om. तानि पितृन आख्यायन्ते; AL. add यानि before स्वरत°.

11. SJR. om. प्रजापतितस्तान्याख्यायन्ते; AK. om. तानि.

12. L. स्वर° for स्वरा°; SJRAK. °संबन्धेन for भेदेन.

16. SJRA. अन्तभूतं च, K. अन्तेन भूतश्च for मत्यः मतार्हः संमतश्च.

उक्तार्थपरिज्ञातारं[1] प्रशंसति —

बन्धुमान् बन्धुमत्यो भवति । जानन्ति ह वा एनं पितृतश्च मातृतश्च । य एवं वेद ॥ २६ ॥

स्पष्टोऽर्थः ॥ २६ ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे देवताध्याये

पञ्चमे ब्राह्मणे प्रथमः खण्डः ॥ १ ॥

---

1. RSJAK. °ज्ञानं for °परिज्ञातारं.

द्वितीयः खण्डः

पूर्वस्मिन् खण्डे साम्नां बहुधा देवता उक्ताः। अथ तदाश्रयभूत-ऋगाश्रितानां छन्दसां देवता विधास्यति। इदानीं तेषां वर्णानभिधातुं प्रतिजानीते —

अथातश्छन्दसां वर्णाः ॥ १ ॥

वक्ष्यन्ते इति शेषः ॥ १ ॥

अथ गायत्र्यादिभेदेन वर्णविशेषानाह —

शुक्ला गायत्र्यो रूपेण सारङ्गं रूपमुष्णिहाम्। पिशङ्गं ककुभां रूपं कृष्णमानुष्टुभं ततः ॥ रोहितं बृहतीनां तु नीलं पाङ्क्तं ततः पुनः। सुवर्णं त्रिष्टुभां रूपं गौरं जागतमुच्यते ॥ २ ॥

सारङ्गं शबलम्। शेषाः स्पष्टाः। एतेषामक्षरसंख्यां तु — **अथ छन्दांसि। गायत्र्युष्णिग्** (कात्यायनसर्वानुक्रमसूत्र ५.१-२) इत्युपक्रम्य **चतुर्विंशत्यक्षरादीनि चतुरुत्तराणि** (का. स. सू. ५. ३) इत्यनुक्रमण्यामुक्तत्वात् चतुर्विंशत्यक्षरप्रभृति चत्वारि चत्वारि अक्षराणि अधिकानि उष्णिगादिषु द्रष्टव्यानि ॥ २ ॥

---

2. R. पूर्वं, SJK. पूर्वखण्डे for पूर्वस्मिन् खण्डे; A. अतस् for अथ; RSJ. °श्रयभूतानां, K. °श्रयौक्थ्यानां; A. °श्रयभक्त्यादीनां for °श्रयभूत-ऋगाश्रितानां.

3. RSJ. अभिधास्यति for विधा°.

9. A. लोहितं for रोहितं.

11. MLR. तेषां for एतेषां; ML. चतुरुत्तराणि च्छन्दांसि गायत्र्युष्णिगित्युपक्रम्य चतुर्विंशत्यक्षराणि चतुरुत्तरा रोहिणीत्यादिना प्रतिपादनात् for अथ छन्दांसि° °क्षरप्रभृति.

13. A. om. इत्यनुक्रमण्यामुक्तत्वाच्चतुर्विंशत्यक्षरप्रभृति चत्वारि.

14. A. adds उत्तराणि after अक्षराणि; A. adds इति चतुरक्षराणि after अधिकानि; SJK. अधिका ... द्रष्टव्याः; A. एवम् ... द्रष्टव्याः for अधिकानि ... द्रष्टव्यानि.

अथातिजगतीप्रभृतीनां वर्णानाह —

अतो यान्यन्यानि च्छन्दांसि श्यावं तेषां ततः पुनः । नकुलं त्वेकपदानां द्विपदा बभ्रुरुच्यते । सारङ्गशुक्लकृष्णरूपाणि ऋग्यजुःसामब्राह्मणान्वितानि ॥ ३ ॥

अतो यान्यन्यानि गायत्र्यादिसप्तच्छन्दोव्यतिरिक्तानि अतिजगती-प्रभृतीनि उत्कृतिपर्यन्तानि तेषां श्यावं कपिशवर्णं विद्यात् । **तथेन्द्रो विश्वस्य राजति** (सा. ४५६) इत्याद्येकपदानां **नकुलं** नकुलजातेर्वर्णं जानीयात् । द्विपदानाम् **इमा नु कम्** (सा. ४५२) इत्यादीनां **बभ्रुः** बभ्रुवर्णः । तथा यानि ऋग्यजुरादिब्राह्मणगतानि गायत्र्यादीनि तेषां च सारङ्गादयो वर्णा द्रष्टव्याः ॥ ३ ॥

अथ यज्ञसंबन्धिनां गायत्र्याद्युपबद्धानां मन्त्राणां देवता वक्ष्यामीति प्रतिजानीते —

ये यज्ञेषु प्रयोक्तव्यास्तेषां दैवतमुच्यते ॥ ४ ॥

अथानुक्तानां विराजां वर्णं दर्शयति —

विराजः पृश्नयो विद्यात् ॥ ५ ॥

पिबा सोममिन्द्र मन्दतु त्वा (सा. ३९८) इत्येवमादयो विराजः । ते पृश्निवर्णा इति जानीयात् ॥ ५ ॥

---

4. KA. om. ऋग्; AKSJ. °न्विता for °न्वितानि.

5. MLAK. om. अतो°; SJR. °छन्दोभ्यो° for छन्दो°.

6. MLA. विधृत्यादीनि, K. (प्रभृति-) धृत्यन्तानि for उत्कृति ... ML. om. तेषां; RSJ.अथ° for तथा; M. om. तथा; SJ. जुषस्व प्रवह for विश्वस्य राजति.

7. ML. विद्यात् for जानीयात्.

8. RSJKA. om. बभ्रुः RSJ. °वर्णम् for °वर्णः; R. om. यानि.

9. KA. om. ऋग्; ML. °यजुरादीनि for °यजुरादि; A. यजुःसामब्राह्मणान्वितानि गतानि for °यजुरादि°; MLAK. om. च.

10. A. °निबन्धनानाम्, K. °बन्धनानाम्, RSJ. °बन्धानाम् for °बद्धानाम्.

12. SJ. यज्ञे यज्ञे for ये यज्ञेषु *see* CN.

15. A. om. एवम्.

16. ML. add च after ते; SJR. om. ते; L. adds इति after जानीयात्.

अथ अग्नेर्गायत्र्यभवद् (दे.ब्रा. १.२.७) इत्यादिमन्त्रद्वयश्रवणं किमर्थमित्याशङ्क्य तत्तात्पर्यमाह —

दैवतं तत उत्तरम् ॥ ६ ॥

तत उत्तरं वाक्यजातं देवताभिधानमित्यर्थः ॥ ६ ॥

अथ अग्न्यादीनां देवतानां गायत्र्यादिसंबन्धकथनपरं मन्त्रद्वयम् । तत्र प्रथमं मन्त्रमुदाहरति —

अग्नेर्गायत्र्यभवत्सयुग्वोष्णिहया सविता संबभूवानुष्टुभा सोम उक्थैर्महस्वान् बृहस्पतेर्बृहती वाचमावत् ॥ ७ ॥

अग्नेः सयुग्वा सहायभूता **गायत्री अभवत्** । प्रजापतेर्मुखादजायत । देवतासु मध्ये अग्निः छन्दःसु मध्ये गायत्री च उभावप्यजायेतामित्यर्थः । तथैव तैत्तिरीयकम्—**प्रजापतिरकामयत । प्रजायेयेति । स मुखतस्त्रिवृतं निरमिमीत । तमग्निर्देवता अन्वसृज्यत गायत्री छन्दः ।** (तै. सं. ७.१-१) इति । यद्वा, सयुग्वेत्युत्तरत्र संबध्यते । अग्नेः सकाशात् गायत्र्यजायतेत्यर्थः । तथा **उष्णिहया** उष्णिक्छन्दसा सह **सयुग्वा** सह युज्यमानः

---

4. SJR. add उक्तात् after तत .

5. SJRAK. om. देवतानां; KA. insert °देवता and SJR. °देवतात्व after °गायत्र्यादि; SJR. om. °कथन°.

6. MA. उपा° for उदा°.

7. ML. संहिता, L. महिता for सविता.

8. SJ. आभवन् A. आगत् for आवत्.

9. SJR. transp. अजायत after अग्निः;

10. M. after मध्ये adds: छन्द इति । यद्वा सयुग्वेत्युत्तरत्र संबध्यते । अग्नेः सकाशात् गायत्र्यजायतेत्यर्थः; MLK. om. मध्ये;

11. SJR. च for एव; MLAK. प्रजाः सृजयेति for प्रजायेयेति.

12. SJ. त्रिप् for त्रिवृतं: SJR. देवताया असृजत गायत्री छन्दसः for देवता ... ।

14. A. om. तथा; K. तदा for तथा; SJR. युज्यमाना for युज्यमानः and add ककुप thereafter.

सविता देवः संबभूव तस्मात् प्रजापतेर्जज्ञे । आपं चापि हलन्तानाम् (म. भाष्य. २.४.८१) इति वचनादुष्णिहशब्दादाप्प्रत्ययः । तथा **उक्थैः** स्तोत्रशस्त्रैर्महस्वान् तेजस्वी **सोमः अनुष्टुभा** अनुष्टुप्छन्दसा सार्धं तस्मादेव प्रजापतेरजायत । तथा **बृहस्पतेर्देवस्य वाचं** वाक्यं बृहतीछन्दः **आवद्** अक्षरत् । अगच्छद्वा । बृहत्या सार्धं बृहस्पतिरपि तस्मात् प्रजापतेर्जज्ञ इत्यर्थः ।

अथ द्वितीयं मन्त्रमाह —

विराण्मित्रावरुणयोरभिश्रीरिन्द्रस्य त्रिष्टुबिह भागो अह्नः । विश्वान् देवान् जगत्याविवेश तेन चाक्लृप्त (प्र?) ऋषयो मनुष्याः ॥ ८ ॥

अपि च **मित्रावरुणयोर्देवयोर्विराट्** छन्दः **अभिश्रीः** प्राप्ताश्रया आसीत् । तथा **इन्द्रस्य त्रिष्टुप्** छन्दः **अह्नो भागो** माध्यंदिनसवनाख्यश्चाभूत् । तथा **जगती** छन्दः **विश्वान् देवान् आविवेश** प्रविष्टा । **तेन** अग्न्यादिदेवताकेन गायत्र्यादिच्छन्दउपनिबद्धेन वेदेन **ऋषयो मनुष्याः**

---

1. SJR. यज्ञे for जज्ञे; A. यः पञ्चापि for आपं चापि; ML. चैव for चापि.

2. A. उष्णिहया छन्दसा सविता for उष्णिह शब्दादाप्प्रत्ययः; MLK. om. प्रत्ययः; AK. उक्तैः for उक्थैः.

3. SJR. मन्त्रैः for स्तोत्रशस्त्रैः; R. सह for सार्ध.

4. SJR. om. देवस्य; SJR. अभवत् A. आपत् for आवत्.

5. LK. आगच्छद् for अगच्छद्; SJR. यज्ञे अजायत for जज्ञे ....

6. SJR. उदाहरति for आह.

10. ML. प्राप्ता श्रिया, K. प्राप्तश्रवा for प्राप्ताश्रया.

11. M. om. तथा; SJR. अथ for तथा; A. °सवनाश्चाख्याताः; ML. °सवनाख्यस्याह्नो भागः for सवनाख्यश्चाभूत्.

12. ML. प्राविष्ट, A. प्रविष्टः for प्रविष्टा.

13. KA. °निबन्धेन for °निबद्धेन. K. वेदो° A. देवाः for वेदेन RSJ. om. वेदेन.

मरणशीला मनुष्याश्च **चाक्लृप्रे** चक्लृपिरे । **वाग्भिरेव** क्लृप्ताः सृष्टाः आसन्नित्यर्थः । अतो गायत्र्यादेरग्न्यादिर्देवता इत्युक्तं भवति ॥ ८ ॥

अथोपरितनानां छन्दसां देवता आह —

प्राजापत्या अतिच्छन्दसो विच्छन्दसो वायुदेवताः। पुरुषो द्विपदानां दैवतं ब्राह्मय एकपदाः स्मृताः ॥ ९ ॥

अतिच्छन्दसः अतिजगत्यतिशक्वर्यादयोऽतिपूर्वाः । **विच्छन्दसः** शक्वर्यष्टिधृतयः । यद्वा । सर्वा एता **अतिच्छन्दसः** । **विच्छन्दसो** गायत्र्यादय एवैकद्व्यक्षरन्यूनाधिकभूताः । ताश्चा क्रमेण प्रजापतिवायुदेवताकाः। द्विपदा एकपदाश्च वर्णाभिधानसमये दर्शिताः । ताश्च क्रमेण पुरुषब्रह्मदेवताकाः ॥ ९ ॥

अथानुद्दिष्टायाः पङ्क्तेर्देवतामाह —

वासवी पङ्क्तिः ॥ १० ॥

वासवी वसुदेवताका ॥ १० ॥ 13

---

1. A. वरुणलोकमनुष्या वापि अक्लृप्तासृष्टाः for मरणशीला°...सृष्टाः; RSJ. मानवाश्च for मनुष्याश्च. SJ. चाक्लृप्ताः, R. चक्लृप्तः for चाक्लृप्रे; ML. om. चाक्लृप्रे चक्लृपिरे; RSJA. om. वाग्भिरेव.

2. R. om. अतो°...°इत्युक्तं भवति; IJ. गायत्र्या अग्न्यादिदेवताकेन गायत्र्यादि छन्दः for गायत्र्यादेरग्न्यादिर्देवता.

3. K. च तासां for छन्दसां; SJR. देवताम् for देवता°.

7. ML. °विधृतयः for °धृतयः; A. याश्च for यद्वा.

9. AK. तद्द्विपदाश्च for द्विपदा एकपदाश्च.

11. RSJ. अनिर्दिष्टायाः for अनु°... .

13. MLAK. om. वासवी; ML. °देवता for °देवताका.

अथ च्छन्दसामुक्तदेवताकत्वे प्रमाणमुपन्यस्यति —

सतुलं मन्येतैतद्देवत्या एवैतेषु छन्दःस्वृचो भवन्तीति ॥ ११ ॥

सतुलं समानं यथा **एतेषु** गायत्र्यादिच्छन्दःसु । यथा **एतद्देवत्या एव** अग्न्यादिदेवताका एव **ऋचः** प्रायेण **भवन्तीति मन्येत** जानीयात् । समनुमन्येतेति पाठे संभवन्तीत्यनुमन्येत विद्यादित्यन्वयः ॥ ११ ॥

अथ अग्न्यादिदेवताकऋगाश्रयाणामपि छन्दसामेतद्देवताकत्वमेव युक्तमित्याह —

छन्दसामु हैतद्दैवतम् ॥ १२ ॥

यथा गायत्र्यादिच्छन्दःसु अग्न्यादिदेवताकत्वमृचां तथा **छन्दसाम् अपि** गायत्र्यादिऋगाश्रयाणाम् । उशब्दोऽप्यर्थे । **एतद्दैवतं** खलु । एता अग्न्यादिदेवता एव भवितुं युक्ताः खल्वित्यर्थः ॥ १२ ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे देवताध्याये पञ्चमे ब्राह्मणे द्वितीयः खण्डः ॥ २ ॥

---

1. MLKA. om. अथ; MLKA. °देवतात्वे for देवताकत्वे.

2. SJRK. स तु न K. सकुलं for सतुलं *see* CN.; SR. °द्दैवत्या° for °द्देवत्या.

3. AK. om. सतुलं … च्छन्दःसु; SRJ. तु शब्दः शङ्का निवृत्यर्थः । स पुरुषः न मन्येत । छन्दसामुक्तदेवताकत्वे प्रमाणं नास्तीति न शङ्केत । for सतुलं समानं.; SJR. om. second यथा.

4. SJRKA. संभवन्ति for भवन्ति; SJR. om. इति; SJRAK. om. मन्येत जानीयात् । समनुमन्यतेति पाठे संभवन्तीत्यनुमन्येत विद्यादित्यन्वयः.

6. SJR. om. अथ अग्न्यादि°…युक्तमित्याह.

9. SJRAK. om. यथा गायत्र्यादि° °मृचां; SJRK. after छन्दसाम् add उ-उशब्दोऽप्यर्थे.

10. A. इति चेतदप्यर्थे for अपि; SJRK. अग्न्यादिदेवताक°, A. अग्न्यादिदेवतात्व for गायत्र्यादि°. RSJA. अपि छन्दसाम् for उशब्दोऽप्यर्थे; SJRK. ह for खलु; A. om. खलु; KA. om. एता°.

11. KRSJA. om. एव.

तृतीयः खण्डः

अथ सामाश्रयाणां छन्दसां देवताकथनप्रसङ्गेन तेषामेव निर्वचनानि दिदर्शयिषुरादौ प्रतिजानीते —

अथातो निर्वचनम् ॥ १ ॥

अथ साम्नां देवताभिधानानन्तरम् **अतः** यतो निर्वचनेन निरुक्तं गायत्र्यादि च्छन्दो गायत्रं साम जागतं सामेत्यादि सामनामसूपयुज्यते अत इत्यर्थः । **निर्वचनं** प्रकृतिप्रत्ययविभागेन व्युत्पादनं प्रदर्श्यत इति शेषः ॥ १ ॥

तत्र गायत्र्या दर्शयति —

गायत्री गायतेः स्तुतिकर्मणः ॥ २ ॥

गै शब्दे । शब्दः स्तवनम् । गायति स्तौति प्रकाशयति देवतामिति **गायत्री** ॥ २ ॥

अथ ब्राह्मणप्रदर्शनेनैव प्रकारान्तरेण निर्वचनं दर्शयति —

गायतो मुखादुदपतदिति हि ब्राह्मणम् ॥ ३ ॥

गायतः वेदजातं शब्दयतः प्रजापतेर्मुखाद् एषा वेदसारभूता **उदपतद्** उदगच्छद् [हि] यतः । अतोऽपि गायत्रीत्यर्थः ॥

अत्रैव गायत्रीविषायां प्रकारान्तरेण निरुक्तो गायत्रीशब्दः ।

---

2. SJR. om. देवता; SJR. निर्वचनं for निर्वचनानि.

7. SJR. om. इत्यर्थः ; TK. दर्श्यते for प्रदर्श्यते.

8. ML. तद् for तत्र; SJ. om. तत्र गायत्र्या दर्शयति.

10. T. adds कै before गै; A. गायत्रीशब्देन for गै शब्दे । शब्दः ; R. देवता, SJ. दैवतानि for देवताम्.

12. KA. ब्राह्मणे for ब्राह्मण°; ML. om. एव.

14. ML. add गायत्री after °भूता.

15. [हि] *see* CN. SJR. ततः for यतः.

16. KA. अतीव गायति for अत्रैव गायत्री°.

गायति च त्रायते च या वै सा गयत्री । या वै खलु गायति च वृथा संसारे मा क्लिश्यत तदुच्छित्तये मामेव भजध्वम् (छा. उ. ३.१२.१) इति स्वयं शब्दयति च । तथा कुर्वाणं दुःखात्मकात् संसारात् त्रायते पालयति सा च गायत्रीति निरुच्यते इति शेषः । **तद्यद् गायंस्तत्रेस्तस्माद्गायत्री नाम** (बृ. आ. ५.१४.४) इति हि **बृहदारण्यकम्** । तथा च स्मार्तं निर्वचनमपि — **गायन्तं त्रायते यस्माद् गायत्री तेन सा स्मृता ।** (व्यास) इति ॥ ३ ॥

अथोष्णिहो निर्वचनं बहुप्रकारं दर्शयति —

उष्णिगुत्स्नानात् स्निह्यतेर्वा कान्तिकर्मणोऽपि वोष्णीषिणीत्यौपमिकम् ॥ ४ ॥

उत्पूर्वात् **ष्णा शौच** इत्यस्माद्धातोरुष्णिक्शब्दः । तदेवाह — **उत्स्नानात्** उद्भूतस्नानवत्त्वादुष्णिक् । यद्वा **स्निह्यतेर्वा कान्तिकर्मणः** । **ष्णिह प्रीताविति** धातुः । यत् प्रीत्यात्मकं तत् कान्तमपि भवतीति कृत्वा

---

1. SJR. गायन्नेव गायते पालयति च for गायति ... या वै; R. पालयति for गायति; M. गायत्री for गायति.

2. MLKA. दुश्चिन्तया for तदुच्छित्तये.

3. K. कुर्वन् for कुर्वाणं.

4. ML. add च after त्रायते; SJR. trans. च after पालयति; TKA. तद्यजा (ज K.) यांस्तत्रे° (A. त्रै°); ML. तद् (L. तवद्) गायांस्तोत्रे for तद्यद्गायंस्तत्रे°.

6. ML. om. च.; SJR. गातारं, KAL. गायते for गायन्तं.

8. T. यथा उष्णिनं for अथोष्णिहः and om. निर्वचनं बहुप्रकारं; ML. trans. निर्वचनं after °प्रकारं.

9. T. उत्स्नाना for उत्स्नानात्; M. वोष्णिग् for वोष्णीषिणी.

11. SJAK. om. धातोर्.

12. T. उत्स्नाना for उत्स्नानात्; A. उत् ततः स्नानमवतीति; T. उद्भूतस्नानवतीति, ML. उत् ततः स्नातीति for उद्भूतस्नानवत्त्वात्; SJR. add वा after उष्णिक्; SJRAK. om. वा कान्तिकर्मणः.

13. T. om. धातुः; SJR. add ततः before यत्; A. उक्तरीत्यात्मक यत् कान्तिमपीहवतीति for यत् प्रीत्यात्मकं ... भवतीति.

कान्तिकर्मत्वम् । स्निह्यते काम्यते इत्युष्णिगित्यर्थः । कान्तं ह्येतद्देवतानां छन्दः । अपि वोष्णीषिणी उष्णीषवती वेत्यौपमिकम् । उपमाप्रयुक्तमभिधानमपेक्ष्योष्णिक्शब्दः । तथा ह्येषा गायत्रीतश्चातुर्भिरक्षैरेवेष्टितेव विवर्तते । चतुरक्षराधिका ह्युष्णिक् ॥ ४ ॥

अथ उष्णिक्प्रभेदस्य ककुभो निर्वचनमाह —

ककुप् ककुद्रूपिणीत्यौपमिकम् ॥ ५ ॥

ककुप्शब्दोऽप्युपमाप्रधानः । यथा वृषभस्य मध्यप्रदेशः ककुप्संज्ञक उच्छ्रितो भवति एवं मध्यमपादस्य जागतत्वात् चतुरक्षरं ककुत्स्थानीयमस्या अस्तीति **ककुप्** । दकारस्य पकारः । **ककुदस्यावस्थायां लोपः** (पा. ५. ४. १४६) इत्यस्मादसमासेऽप्यकारलोपः ॥ ५ ॥

---

1. ML. °कर्मण इत्युक्तम् for °कर्मत्वम् ; T. adds सर्वं befoie कान्तं ; A. तद्देवानां for एतद्देवतानां.

2. R. चोष्णीषिणी ; SJ. चौष्णीषी for वोष्णीषिणी ; SJRAK. °वत्येव foi °वती वा°.

3. AK. °अपि° for अभि° ; A. adds चतुश् before चतुर्भि°.

4. SJRK. वर्तते for विवर्तते ; A. चतुरुत्तरा° for चतुरक्षरा° ; SJRK. °धिक्याद् for °धिका ; SJRML. om हि ; SJR. add प्रभेदस्य after उष्णिक्.

5. SJR om. उष्णिक् प्रभेदस्य ; A. °प्रसङ्गादस्य for °प्रभेदस्य.

6. SJ. ककुद्° for ककुद°

7. ML. °छन्दसो° for °शब्दो° ; T. om. शब्दोपि ; T. परम° for उपमा° ; TAL. वृषस्य for वृषभस्य ; A. °प्रदेशस्य ककुप् संज्ञा उच्चतो° for °प्रदेशः ... उच्छ्रितो° ; ML, °संज्ञ° for °संज्ञक°.

8. A. adds अस्य after एवं ; L. मध्यः for मध्यम° ; SJRMK. अस्य, A. अक्षरस्य for अस्या°.

10. RT. om. अस्माद् ; M. अक्समासे ; L. ऋक्समासे for असामासे ; M. om. अपि.

ककुप्शब्दस्य काकुभं दन्तधावनमित्यादावर्थान्तरस्मरणात् स्वाभिमतार्थ-माह —

ककुप् च कुब्जश्च कुजतेर्वोब्जतेर्वा ॥ ६ ॥

ककुप्कुब्जशब्दौ कुजतेरुब्जतेर्वोत्पन्नौ । कुज (च?) कौटिल्य-प्रतिष्टम्भविलेखनेषु । उब्ज आर्जवे । अत्र न्यग्भावार्थः । अतः कौटिल्यन्य-ग्भावार्थकधातुद्वयार्थस्यात्र संभवात् ककुप्शब्दः ॥ ६ ॥

अथानुष्टुभो निर्वचनमाह —

अनुष्टुबनुस्तोभनात् ॥ ७ ॥

स्तोभतिर्वृद्ध्यर्थः । गायत्रीतः समाक्षरपादवृद्धेः ॥ ७ ॥

उक्तार्थे ब्राह्मणसंमतिं दर्शयति —

अन्वस्तौदिति हि ब्राह्मणम् ॥ ८ ॥

निरुक्ते प्रकारान्तरेण ब्राह्मणवाक्यमुदाहृतम् । **गायत्रीमेव त्रिपदां सतीं चतुर्थेन अनुष्टोभतीति च ब्राह्मणम्** (नि. ७. ३. १२) ॥ इति ॥ ८ ॥

---

1. SJR. ककुभ° for ककुप्; L. °छन्दस्य for °शब्दस्य. SJR. °मतमर्थम् for °मतार्थम्.

3. L. कूजतेर्; A. कुब्जतेर् for कुजतेर् *see* CN.

4. A. om. ककुप्कुब्ज°... °रुब्जतेर्; ML. °छन्दः for °कुब्जशब्दौ; A. इत्युत्पन्नम्; ML. °वोत्पन्नः for वोत्पन्नौ; L. कूज for कुज *see* CN.

5. AK. अर्थं for अत्र; ML. om. अत्र; M. नैभव्यम्, L. नैगव्यम् for न्यग्भाव°; A. कौटिल्येनान्तर्भावात् for कौटिल्यन्यभावार्थक°.

6. निगव्य°; L. निगर्व्य° for न्यग्भाव°; T. °कर्तृ° for °धातु°. TRML. °छन्दः for °शब्दः.

7. AT. om. निर्वचनम्.

9. RSJ. add तत् before समा°.

11. T. °स्तौषीद् for °स्तौद् *see* CN.; AK. add भवति after ब्राह्मणम्.

12.. TA निरुक्तेः; R. निरुक्त° for निरुक्ते. A. adds उक्त before प्रकारा°.

अथ पिपीलिकामध्याया निर्वचनं वक्तुं पिपीलिकाशब्दस्य निर्वचनमाह —

पिपीलिका पेलतेर्गतिकर्मणः ॥ ९ ॥

न ह्यसौ क्षणमप्युदास्ते ॥ ९ ॥

इदानीं तच्छन्दोनिर्वचनमुपमाप्राधान्येन दर्शयति —

पिपीलिकमध्येत्यौपमिकम् ॥ १० ॥

पिपीलिका नामाभितः स्थूलो मध्ये कृश उद्भिज्जः प्राणिविशेषः। तन्मध्यमिव मध्यं यस्याः सा तथोक्ता। मध्यमपदलोपी समासः। अस्यास्तनुमध्यत्वमनुक्रमण्याम् — **एकादशिनोः परः षट्कस्तनुशिरा। मध्ये चेत् पिपीलिकमध्या** ॥ (शु. य. सर्वा. सू. २७-२८) इत्युक्तम्।

अथ बृहत्या निर्वचनमाह —

बृहती बृहतेर्वृद्धिकर्मणः ॥ ११ ॥

अस्या अनुष्टुभः सर्वपादेष्वेकाक्षरवर्धनात् प्रवृद्धत्वम् ॥

---

2. R. दर्शयति for आह.

4. A. न ह्यस्यैकक्षणमप्यूदा [स्ते], TK. नह्यस्यैक्षणमपि उदास्ते (T. °दात्ते स्तः) for न ह्यसौ ....

5. SJR. om. उपमाप्राधान्येन.

7. SJR. उभयतः for अभितः; AT. उद्भिद्प्राणि° for उद्भिज्जः प्राणि°.

8. L. °लोपि°, M. °लोप° for °लोपी; SJR. तस्या° for अस्या°.

9. SJR. °क्रम्य; A. °क्रमवत्याम् for °क्रमण्याम्; T. षट्चक्रः for षट्कः; A. °शिखत्वात्; T. °शिखा त्वा°; K. °शिखे त्वां°; L. शिखोर्°; M. शिखो° for °शिरा.

12. SJR. बृंहतेर्° for बृहतेर्°.

13. SJR. अनुष्टुभः for अनुष्टुप्तः; A. प्रसिद्धत्वम् K, प्रविद्धत्वम् for प्रवृद्धत्वम्.

अथ विराजो निर्वचनं बहुप्रकारमाह —

विराड्विरमणाद्विराजनाद्विराधनाद्वा ॥ १२ ॥

विराट्शब्दः, रमु क्रीडायां, राजृ दीप्तौ, राध साध संसिद्धौ इति त्रिभ्यो धातुभ्योऽन्यतमेनापि निष्पाद्यते । धातुत्रयार्थस्य अस्मिन् संभवात् ॥ १२ ॥

अथ पङ्क्तेर्निर्वचनमाह —

पङ्क्तिः पञ्चिनी पञ्चपदा ॥ १३ ॥

पञ्चसंख्यायोगात् पङ्क्तिशब्दः पञ्चत्वप्रदर्शनपरः । [अतः] पञ्चपदेति ॥ १३ ॥

अथ त्रिष्टुभो निर्वचनं दर्शयति —

त्रिष्टुम् स्तोभत्युत्तरपदा ॥ १४ ॥

स्तोभतिः स्तुतिकर्मा उत्तरपदं यस्याः सा त्रिष्टुप् ॥ १४ ॥

तदनन्तरं पूर्वपदस्य त्रिशब्दस्य किं प्रवृत्तिनिमित्तमिति स्वयमेव पृष्ट्वा उत्तरमपि ब्रूते —

का तु त्रिता स्यात्तीर्णतमं छन्दो भवतीति ॥ १५ ॥

---

1. T. om. बहुप्रकारमाह.
2. M. adds च after विराड्.
3. R. om. साध.
4. A, त्रयो धातवः अर्थान्तरेण for त्रिभ्यो धातुभ्यो °; SJL. अन्यतरेण for अन्यतमेन; ATL. निष्पद्यते for निष्पाद्यते; AK. स्वस्मिन्, SJR. तस्मिन् for अस्मिन्.
8. A. °दर्शनं, SJRK. °प्रदर्शनं for °प्रदर्शनपरः.
12. SJR. स्तोभ इति for स्तोभतिः *see* CN; A. अस्याः for यस्याः
13. SRJT. अस्त्युत्तरपदं, AK. अर्थान्तरं for तदनन्तरं.
14. A. विशदयति for ब्रूते.

अस्याः त्रिता त्रित्वं का स्याद् इति प्रश्नः । तस्य उत्तरं तीर्णतमं छन्दो भवतीति । पूर्वेभ्यो महत्त्वात् । यद्वा सकारोऽत्र लुप्तः । स्तीर्णतमम् । तरतेः स्तृणातेर्वा पूर्वं पदम् । उभयथार्थोपपत्तेः । तरणात् स्तोभनाद्वेति द्विधातुजत्वम् ॥ १५ ॥

अथ त्रिशब्दः वृच्छब्दश्च [इति] द्वन्द्वपूर्वं पदमित्याह —

त्रिवृद्वज्रस्तस्य स्तोभिनीवेत्यौपमिकम् ॥ १६ ॥

उभयतस्त्रिकोटित्वात् वज्रस्त्रिवृत् । तस्य स्तोभिनीवेति उपमाप्रधानोऽयं निर्देशः । यत् त्रिवृत् स्तोमः तत् त्रिष्टुभस्त्रिष्टुप्त्वम् इति ब्राह्मणम् ॥१६॥

अथ जगतीशब्दं निर्वक्ति —

जगती गततमं छन्दो जज्जगतिर्भवति क्षिप्रगतिः ॥ १७ ॥

पूर्वेभ्यो छन्दोभ्यो महत्त्वात् गततमत्वम् । अतिशयेन

---

1. SJR. अस्य for अस्याः; AMLK. त्रितायास्त्रित्वं for त्रिता त्रित्वं; SJR. अस्य for तस्य.

2. ATK. om. छन्दो भवतीति; SJR. द्वन्द्वांशलकारो°; KA. यद्द्वादश (A. शाक्षरो°) कारो° for यद्वा सकारो°; SJR. om. अत्र; SJRM. तीर्णतमं तरतेर्वा पूर्वपदम् for स्तीर्णतमम् । तरतेः ... .

3. SJR. °पत्तिः for °पत्तेः; SJR. च for वा; A. after स्तोभना one folio is missing and the folio following begins with: —ते । ततः कृतयुगस्यादौ° (p. 33. l. 7).

4. T. द्विधा त्रिष्टुप्त्वम्; SJR. त्रैष्टुभत्वम् for द्विधातुजत्वम्.

5. SJR. त्रिवृच्छब्द (R. °ब्दः) पूर्वपदम् for अथ त्रिशब्दः...

6. R. स्तौभम्, KTSJ. स्तोभम्, A. स्तोभनी, M. स्तभिनी, L. स्तौभिनी for स्तोभिनी, *see* CN.; TK. एव for इव.

8. SJR. त्रिवृत्तः for त्रिवृत्; SJRT. स्तोभं for स्तोभः; SJR. om. तत्.

9. R. °च्छन्दः, SJ. °च्छन्दं for °शब्दं.

10. SJR. om. commentry on जगती... *see* CN.

11. M. बृहत्त्वम् for गततमत्वम्.

गन्तव्यं छन्दः। किंचासौ **जज्जगतिर्भवति**। अनुकरणशब्दोऽयम्। तदेव व्याचष्टे — **क्षिप्रगतिरि**ति। अतोऽपि जगतीशब्द इत्यर्थः॥ १७॥

उक्तनिर्वचने ब्राह्मणमुदाहरति —

जज्जलाकुर्वन्नसृजतेति हि ब्राह्मणम्॥ १८॥

पूर्वं प्रजापतिः जज्जलाकुर्वन् जगतीं सृष्टवानित्यर्थः। निरुक्तेऽप्येवं दर्शितम् — **जगती गततमं छन्दो जज्जगतिर्वा जज्जलमानोऽसृजदिति च ब्राह्मणम्** इति॥ १८॥

अथ अतिच्छन्दसो निर्वचनम् —

अतिच्छन्दाश्छदेरर्थे॥ १९॥

अतिपूर्वं छन्दोऽतिच्छन्दाः। छन्दसोऽर्थज्ञानेनैवातिच्छन्दसो विज्ञानं सुलभमिति भावः। तथा च जगतीमतिक्रम्याधिकबलवत्त्वेन या वर्तते सैवातिजगतीत्येवं फलितम्॥ १९॥

अथेदानीं छन्दस एव निर्वचनं वक्ति —

छन्दांसि छन्दयतीति वा॥ २०॥

[छन्दयति] ऋ[ग्] गत[भावानि]त्यस्मात् छन्दःशब्दः। गच्छति

---

1. T. गन्तव्या for गन्तव्यं and adds पङ्क्ति [:] thereafter; MKT. जगतिर्° for जज्जगतिर्.

4. M. जलं, K. जर्झरा°, A. जर्जरा°, SJ. जज्मला° for जज्जला°.

5. M. जलं, K. जर्झरं, T. जर्जरा, for जज्जला°.

7. ML. हि for च.

8. SJR. अतिजगत्याद्यतिच्छन्दांसि निर्वक्तुमुपक्रमते for अथ...निर्वचनम्.

10. SJR. om. अतिपूर्वं छन्दोऽतिच्छन्दाः; MLTK, om. छन्दसो°... फलितम्.

13. MLT. subst. छन्दशब्दस्य निर्वचनमाह for अथेदानीं ... वक्ति.

14. RML. छदयति, K. छादयति for छन्दयति.

15. SJR. subst. छद (SJ. छन्द) संवरणे (चुरा) छदयति वर्णानिति। तथा च निरुक्त छन्दांसि छादनात् इति (R. om इति) for [छन्दयति] ... [फलि]तम्. see CN.

ह्येतद् वाग्जातम् । यद्वा । छादयति जपितारम् इति । **छन्दांसि छादनात्** (नि. ७.३.१) इति निरुक्तम् । **छादयन्ति ह वा एनं छन्दांसि पापेभ्य** इति ब्राह्मणम् ॥ २० ॥

अथ उक्तगायत्र्यादीनामेव एकाक्षरन्यूनत्वाधिक्याच्च ये निचृद् - भुरिक्-संज्ञके छन्दसी भवतः तयोः निर्वचनमाह —

निचृत् निपूर्वाच्चृतेः भरणात् भुरिगुच्यते ॥ २१ ॥

चृती हिंसाग्रन्थनयोः इत्यस्मात् **निपूर्वात् निचृच्छब्दः** । अस्ति च हिंसार्थोऽत्राक्षरन्यूनत्वात् । **भृञ् भरणे** इत्यस्मात् भुरित् (क्?) । अस्ति चात्र भरणमेकाक्षराधिक्यात् । न्यून[त्वा]धिक्याच्च एते निचृद्भुरिजावित्यनुक्रान्तम् ॥ २१ ॥

यदर्थं गायत्र्यादिच्छन्दसां वर्णदेवतानिर्वचनानि प्रतिपादितानि तेषां मध्ये गायत्र्यां गीयमानस्य गायत्रसाम्नः सर्वेषां प्राथम्यात् [तद्-] देवता बहुधा दर्शयति—

---

1. M. वा जातं, L. वा जगातं, T. वाग्यातं K. वाक्यजातं for वाग्जातम् *see* CN.; MLK. विकारम् for जपितारम्.

4. SJR. subst. तत्र गायत्र्यादिषु यथानियमं चतुर्विंशत्याद्यक्षराभावे तासां नामान्तरम् for अथ उक्त°... निर्वचनम् *see* CN.; M. निवृत् for निचृत्; TMK. °भुरित् for °भुरिक्.

6. TM. निवृत् for निचृत्; T. वृतेः M. सृतेः for चृतेः; SJR. split the *sūtra* into two as (1) निचृन्निपूर्वस्य चृतेः and (2) भरणाद् भुरिगुच्यते with separate introdudtion and commentary thereon. *See* CN. and Appendix A. SJ. भुरिज°, T. भूऋग् foı भुरिग्.

7. TK. वृति, M छृति for चृती; T. निवृत्, M. निछृत् for निचृत्.

8. T. हिंसनार्थः ... °न्यूनात् for हिंसार्थों ...; ML. °न्यूनत्वम् for °न्यूनत्वात्. T. डुभृञ् for भृञ्; M. अस्य for अस्ति.

9. T. तत्र for अत्र; TK. न्यूनाधिक्यात्नैकेन (K. °न्नैके) for न्यून[त्वा]धिकयाच्च एते; TM. निवृद् for निचृद्; T. इत्यन्तम् for इत्यनुक्रान्तम्.

11. SJR. यदर्थं... *see* Appendix A,; K. गायत्र्यादिषु for गायत्र्यादि; T. वर्णवद् for वर्ण°; T. °दित ... त्र्यां damaged.

12. T. सर्वे ... बहुधा damaged.

अथातो गायत्रमाग्नेयं भक्त्या भवति । देवानां वर्षीणां वा परमेष्ठिनो वा प्राजापत्यस्य साम ॥ २२ ॥

गायत्रं साम इति संबन्धः । तत् **साम भक्त्या** प्रजापतेर्मुखात् सहोत्पत्तिलक्षणद्वारेण **आग्नेयम्** अग्निदेवताकं भवति । वस्तुतस्तु देवदेवत्यम् ऋषिदेवत्यं वा प्राजापत्यं वा । परमेष्ठिन्शब्दः तद्धितावयवभूतप्रजापतिशब्दविशेषणम् । परमे निरतिशयलोके तिष्ठतीति परमेष्ठी । यद्वा स्वार्थिकः तद्धितः । **परमेष्ठिनः** प्रजापतेः साम वेत्यर्थः ॥ २२ ॥

अथ यासु गायत्रं भवतीत्यतिदिष्टं तत्प्रदेशेषु उक्तदेवताकं साम गायत्रं गातव्यमित्यतिदिशति —

सावित्रीगेयं यत्रागीतम् ॥ २३ ॥

यत्र येषु प्रदेशेषु गायत्रं भवतीत्युक्तं न गीतं तत्र **सावित्री** (र्यां ?) सवितृदेवताकायां तत्सवितुरित्यस्यां गीतं साम **गेय**मित्यर्थः ॥ २३ ॥

अथाविहितेषु यत्सावित्रीगानमतिदिश्यते तदुदाहृत्य दर्शयति —

र र र र १

तत्सवितुर्वरेणियोम् । भर्गो देवस्य धीमही ऽ २ । धियो

4. L. °दैवत्यम् for °देवत्यम्; T. दे[वदेवत्यं ऋषि] damaged.

5. T. शब्दतस्त्रितावयव°; for शब्दः °तद्धितावयव°.

6. K. °विशेषं for °विशेषणम्.

7. M. स्वार्थके, K. स्वार्थः for स्वार्थिकः.

8. KT. तासु for यासु; ML. add तासु before यासु; SJR. *see* Appendix A.; ML. गायत्री for गायत्रं.

10. ML. add यथा before सावित्री°.

11. T. नागीतं; K. क्रमत्वं for न गीतं; ML. om. न गीतं, *see* CN ML. add यथा after तत्र.

12. ML. add यथा before गीतं and तथा after साम.

13. M. यथा° for अथा°.

र र २
योनः प्रचो १२१२ । हुम् आ २ । दायो । आ २३४५ ॥ [इति] ॥

अथात्र ग्रन्थे विहितस्य देवतापरिज्ञानस्य फलमाह —

ऋषीणां विषयज्ञो यः स शरीराद्विमुच्यते ।
अतीत्य तमसः पारं स्वर्गे लोके महीयते ॥

सहस्रयुगपर्यन्तमहर्ब्राह्मं यदुच्यते ।
नाकस्य पृष्ठे तं कालं दिवि सूर्य इव रोचते ॥

ततः कृतयुगस्यादौ ब्रह्मभूतो महायशाः ।
सर्वज्ञो धृतिमानृषिः पुनराजायते स्मरन् ॥ इति ॥

स्मरन्निति ॥ २४ ॥

ऋषयो मन्त्रद्रष्टारः मन्त्रज्ञाः । तेन तदाश्रितानि सामानि लक्ष्यन्ते । तेषां विषयः देवताछन्दोनिर्वचनानि । तदभिज्ञो यः स तथोक्तं फलं प्राप्नोतीति शेषः ॥

यद्वा साम्नाम् ऋषिदेवतयोरुभयोरप्यपेक्षितत्वात् तदुभयप्रतिपादकार्षेय-देवताध्यायाख्यग्रन्थद्वयस्य एकत्वाभिप्रायेण ऋषीणां विषयज्ञ इत्युपन्यासः ।

1. SJ. after दायो । आ conclude with a note directing us to refer this mantra in उत्तरार्चिक where it has been interpreted by the commentator.

2. L. अभिहितस्य for विहितस्य.

4. K. om. अतीत्य ... रोचते.

5. MLR. ब्राह्म्यं for ब्राह्मं.

6. A. resumes from [रोच] ते । ततः ...

7. L. °पूतो for °भूतो.

10. A. om. मन्त्रज्ञाः.

11. A. विषयज्ञः for विषयः; ML. तस्योक्तं for तथोक्तं; A. तस्मात् for सः; ML. om. प्राप्नोतीति शेषः.

13. MK. om. °उभयोर्°.

ऋषीणा।मित्युपलक्षणम् । देवतानां विषयज्ञस्याप्युक्तं फलमस्त्येवेत्यभिप्रायः । स्मरन्निति । पूर्वजन्मादिकं स्मरन्नित्यर्थः । शिष्टं स्पष्टम् ॥ २४ ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे देवताध्याय-ब्राह्मणभाष्ये तृतीयः खण्डः ॥ ३ ॥

1, ML. विषयस्य for विषयज्ञस्य.

2. A. om. शिष्टं स्पष्टम्; T. after स्पष्टम् adds अभ्यासो ग्रन्थ-समाप्त्यर्थः । इति देवताध्याये तृतीयः खण्डः । वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः । इति श्रीमद्राजाधिराजराज-महेश्वरवैदिकमार्गप्रवर्तक श्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीयसामवेदार्थप्रकाशे देवताध्यायः ।।

K. concludes with देवताध्याये तृतीयः खण्डः ।। A. इति देवताध्याय-ब्राह्मणभाष्यं समाप्तम्.

चतुर्थः खण्डः

पूर्वस्मिन् खण्डे **तत्सवितुरित्यस्यां** सावित्र्यां गायत्रं गीतम् । तस्य च देवता उक्ताः । आर्षेये चायातयामत्वं ऋषयश्च प्रतिपादिताः । गानप्रकारस्य च लक्षणमुक्तं **प्रथमायां वा** (आ. ब्रा. १. १५) इत्यादिना । इदानीं गायत्रसामाधारभूतायाः तस्याः सावित्र्याः सकलदेवतावयवत्वेन उपासनमुच्यते —

अथ सावित्र्यङ्गानि व्याख्यास्यामः । शिरो ब्रह्म । ललाटं द्यौः । चन्द्रादित्यौ चक्षुषी । मुखमग्निः । जिह्वा सरस्वती । त्वष्टा ग्रीवा । वसवश्च रुद्राश्च बाहू । उरो वायुः । रोमाणि पा(वा?)यवः । पृष्ठमिन्द्रः । विष्णुर्नाभिः । प्रजापतिर्जघनम् । ऊरू मरुतः । वेदाः पादौ । स्मितं विद्युत् । श्वसितं वायुः । अस्थीनि पर्वताः । समुद्रा वासांसि । नक्षत्राणि अलंकारः ॥ १ ॥

शिरो ब्रह्म हिरण्यगर्भः सत्यलोकः शिरः । तथा **ललाटं द्यौः** साधिष्ठात्री । **रोमाणि वायवः** क्षुद्रावयवाः । **ऊरू मरुतः** मरुद्गणाः । अदः(धः?)-प्रत्यक्षेण परिदृश्यमानभूतलोपलक्षितम् अधोलोकसप्तकम् । **पादौ** सप्तपातालपादेत्यर्थः । **ललाटं द्यौः** इत्यनेन ललाटोपलक्षितनाभिपर्यन्तावयवाः द्युलोकोपलक्षितोर्ध्वलोकाः [**पादौ** इत्यनेन] पादोपलक्षिताः अधो [लोकाः सप्त] इत्यर्थः । तथा च अधोर्ध्वभागः शरीरस्येति सकललोकात्मकत्वमुक्तं भवति । तथा च गायत्रीविद्यायां **गायत्री वा इदं सर्वं भूतम्** इत्यादिना

---

2. R. has only the text and om. the commentary thereon; M. अस्य for तस्य.

5. M. °न्वयत्त्वेन for °वयवत्त्वेन.

8. L. om. उरो वायुः; MR. om. रोमाणि पा(वा?)यवः.

13. L. पायवः for वायवः.

16. ML. °लोका इत्यर्थः । तथा चाधो [लो]क सप्तकं (M. तथा चा–धेनुसप्तकं) पादोपलक्षितोर्ध्वभागः for °लोकाः [**पादौ** ...] ... अधोर्ध्वभागः. *see* CN.

सकलचराचरात्मकत्वस्य प्रतिपादनाद् इह तु शिर आद्यवयवत्वेन प्रपञ्चजातं निरूप्यते । श्वसितं वायुः सर्वसमष्टिभूतवायुः श्वसितम् । शिष्टं निगदस्पष्टम् ॥ १ ॥

ब्रह्मादीनां देवानां लोकानां च सर्वेषां सावित्र्यङ्गत्वेनोपासनं सर्वात्मकतया एवं वेदनं कर्तव्यमित्याह —

य एवं वेद ॥ २ ॥

एतद्वेदितुः फलमाह —

दुष्टतादुरुपयुक्तान्न्यूनाधिकाच्च सर्वस्मात् स्वस्ति ॥ ३ ॥

दुष्टता दुष्टस्य भावः ; रागद्वेषादिकलुषितमनस् [कता] तथा (-या ?) **दुरुपुयुक्तात्** दुष्टोपयोगात् अश्रद्धालसा (स्या ?) दिप्रयुक्तकरणदोषदुष्टोच्चरणात् इत्यर्थः । तथा **न्यूनाधिकाच्च** न्यूनाधिकोच्चारणाच्च । किंच **सर्वस्मात्** । किं संकोचतः ? सर्वस्मात् सावित्रीजपकरणे संभावितसर्वदोषात् **स्वस्ति** मङ्गलं भवत्येव तस्य वेदितुः ॥ ३ ॥

किंच —

स्वस्ति देवऋषिभ्यश्च ॥ ४ ॥

[**देवऋषिभ्यः**] गायत्र्यनुगतेभ्यः । सकाशात् भवतीति शेषः ॥

यद्वा आर्षेयदेवताध्यायद्वयप्रतिपादितार्थवेदितुः फलं **दुष्टतादुरुपयुक्ता**दित्यादि । तत्र वेदाध्ययने सावित्रीजपे च संभावितसर्वदोषात् स्वस्ति भवतीति । अत एव देवता **देवऋषिभ्यश्च** [इति] । देवा ऋषयश्च ये आर्षेयदेवताध्यायाभ्यां प्रतिपादितास्तत्सकाशाच्च स्वस्ति भवति । ते तु सम्यक्प्रयोगेऽपि मन्त्रानुगताः प्रीताः सन्तः स्वस्ति कुर्वन्तीत्यर्थः ॥ ४ ॥

---

2. L. निगदतः for निगद°; S. subst. निगदतः स्पुटम् for निगद°...
3. M. °त्र्यर्भकत्वेन° for त्र्यङ्गत्वेन°.
7. LR. दुष्टुता *see* CN.
15. ML. transp. the sutra: ब्रह्मसत्यं ... after भवतीति शेषः.
17. M. संभावितस्य दोषात् for संभावित....
19. M. adds इति after भवति; M. तत्° for ते तु.

ब्रह्म सत्यं च पातु मामिति ॥

ब्रह्म सत्यं च पातु मामिति ॥ ५ ॥

ब्रह्म वेदः सावित्र्या सह **सत्यं च** तदुभयगतमवितथत्वं याथार्थ्यं च वास्तवं विद्यमानं दुष्टप्रयोक्तारम् अन्यथा च न्यूनाधिकभावेन प्रयोक्तारमपि **मां पातु**। तादृशदोषजन्यप्रत्यवायाद् रक्षत्विति प्रार्थयेदित्यर्थः । **दुष्टादुरुपयुक्ता**दित्यादिकोऽयं मन्त्रः । स्वस्त्यस्तु मङ्गलानि भवन्तु । द्विरुक्तिर्देवताध्यायपरिसमाप्त्यर्था । प्रार्थनायामादरार्था च ॥ ५ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
देवताध्यायब्राह्मणभाष्ये चतुर्थः खण्डः ॥ ४ ॥

॥ देवताध्यायब्राह्मणभाष्यं समाप्तम् ॥

ॐ

---

3. M. अपि तथात्वयाथार्थ्यं, L. अवितत्वयाथार्थ्यं for अवितथत्वं याथार्थ्यं.

4. L. न्यूनाधिकारन्यूनभावेन for न्यूनाधिकभावेन.

7. M. °मादरार्थता for °मादरार्था.

ॐ